**N. SRINIVASA RAGHAVACHARIAR**
(SEVA SWAMY)
**Winner of President's Award for Sanskrit - 1992**
Desika Bhaktha Ratnam, Nyaya Siromani,
Sahitya Ratnam, Vidya Vinodha, Daya Sevaka,
Desika Darsana Seva Dhureena, Desika Seva Saktha
Desika Darsana Rakshamani, Samskruta Prachara
Chatura, Shudhadwaita Bhushana Vedanta Vidvan
Desika Darsana Choodamani

श्रीः
श्रीमतेलक्ष्मीहयवदनपरब्रह्मणे नमः
श्रीपद्मावती समेत श्रीश्रीनिवासपरब्रह्मणे नमः



ஸ்ரீமதே நிகமாந்த மஹாதேசிகாய நம:
ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवं उपास्महे ॥

2, Lakshmipuram, Villivakkam,
MADRAS - 600 049

# अभिनन्दनम्

पुष्पा सन्ततमाजुहाव शतकैर्नाम्नां मनोरञ्जकैः
गद्यं भोग्यतमं विधाय सुभगं भद्रप्रदं मंगलम् ।
त्यागब्रह्म समर्च्य मंगलगुणा भक्ताग्रगण्या सुधीः
श्रेयः प्राप्य परं चकास्तु भुवने संगीतसर्वोन्नता ॥

त्यागब्रह्मकृपा विहारमयते यामाश्रिता सन्ततं
यस्याः चेतसि नान्यदस्ति भुवने श्रीत्यागरायं विना ।
नादब्रह्मशुभानुभूतिपरमा वीणाकरा धीमती
चित्तारामविहारपूजनरता पुष्पा चिरं काशताम् ॥

श्रीवत्सेन प्रथितविभवा त्यागरायार्यदृष्टा
भक्त्यारामा विबुधपरिषद्गीयमानप्रभावा ।
भव्यज्ञाना सुदृढधिषणा भक्तिभावप्रपूर्णा
पुष्पामोदा विलसतु मुदा पुष्पवल्ली धरित्र्याम् ॥

त्यागब्रह्मसमर्चनेन महिता गीतेन वैराग्यतः
पूर्णप्रज्ञसमा परिश्रमयुता भक्त्युज्ज्वला सन्ततम् ।
नामावल्यभिलेखनेन नितरां सौवर्णकान्त्यावृता
श्रेयोभिस्सहिता विभातु विबुधस्वान्तेषु सर्वोत्तरा ॥

आमूलाग्रं कीर्तितं नामजातं
दृष्ट्वा हृष्टो गद्यमप्यद्भुतं तत् ।
वारं वारं मङ्गलम् विस्मयंच
प्राप्तस्सोऽहं श्रीनिधी राघवार्यः ॥

पुष्पोद्गीतं पुष्पगन्धोपजुष्टं
भक्त्या धार्यं रागतोऽप्युत्तमाङ्गैः
भूरिश्रेयो विन्दतां पुष्पवल्ली
श्रीवत्सेनामोदतां श्लाघनीया ॥

नामावल्या त्यागरायो महात्मा
शोभामन्यां विन्दमानस्समेषाम्
श्रेयो दिव्यां शेमुषीं शान्तिभक्ती
भूयो दद्यात् वर्धयन्नेव पुष्पाम् ॥

विल्लिवाकम्
मद्रास
२१-९-९३.

सेवा श्रीनिवासराघवाचार्यः